निषेधौ विशेषणसुपसंक्रामतः सति विशेष्ये बाधे" दीधितौ न्यायवाक्यम् "एतमन्त्रमयात्मानमुपसंक्रामति" तैत्ति० प्रति+सम्+प्रतिकूलसङ्क्रमणे निवृत्तौ "तावन्न संसृतिरसौ प्रतिसंक्रमेत" भाग० ३।९।१०श्लो०। "प्रतिसंक्रामयद्विश्वम्" ४।२४।४९श्लो० प्रतिसंक्रामयत् निवर्त्तयत् ।

क्रम पु० क्रम–भावकरणादौ यथायथं घञ् मान्तत्वान्नवृद्धिः । १पादविक्षेपे २पादे हेमच० अर्थानां नैयत्येन ३पूर्वापरावस्थाने। ४कल्पे अनुष्ठाने अमरः ५सामर्थ्ये (सामर्थ्यहेतुकव्यापारे) ६आक्रमणे च मेदि० । ७वेदसंहितानुसारिपाठतद्विलोमरूपे पाठभेदे। क्रमवेदशब्दे तत्स्वरूपभेदादिकं १४११पृ०चरणव्यूहवाक्यतद्भाष्याभ्यां दर्शितम् । ८विष्णौ "ईश्वरोविक्रमी धन्वी मेधावी विक्रमः क्रमः" विष्णुस० । 'क्रमणात् प्राणरूपेण गगनात् । क्रमणहेतुतया । (प्राणिगमनसाधनपादविन्यासहेतुभूतरथ्यादिप्रकाशनाधिष्ठातसूर्यादिदेवरूपतया) वा क्रमः" भा० ६परिपाट्यां यथोचितसन्निवेशे मेदि० । शेषशेषिभावे अधिकृताधिकारे वा सत्येव वैदिककर्मणोरनुष्ठाने पौर्वापर्य्यरूपक्रम ग्रहणमिति शा०भा०स्थितम् तन्नियामकञ्च श्रुत्यर्थपाठप्रवृत्तिकाण्डमुख्यभेदात् षड्विधः तस्य च कर्म्मविशेषे विशेषेण व्याख्याता तद्विवृतिः मीमांसा ५अ०।१पा०भाष्ययोर्दर्शिता यथा "श्रुतिलक्षणमानुपूर्व्यं तत्प्रमाणत्वात्" जै० १सू०

"चतुर्थेऽध्याये प्रयोजकाप्रयोजकलक्षणं वृत्तं, तन्न विस्मर्त्तव्यम्, इह इदानीं क्रमनियमलक्षणम् उच्यते, तत् श्रुत्यर्थपाठप्रवृत्तिकाण्डमुख्यैर्वक्ष्यते, श्रुत्यादीनाम् च बलाबलम् । आदितस्तु श्रुतिक्रमश्चिन्त्यते,–किं यथाश्रुति पदार्थानाम् क्रमआस्थेयः, उत अनियमेन ?–इति । किं प्राप्तम् ?–एकत्वात् कर्त्तुः, अनेकत्वाच्च पदार्थानाम्, अवश्यम्भाविनि क्रमे लाघवात् प्रयोग आशुभावाच्च अनियमः–इत्येवं प्राप्ते ब्रूमः

"श्रुतिलक्षणम् आनुपूर्व्यं तत्प्रमाणत्वात्–इति श्रुतिर्ग्रहणम् अक्षराणां, तन्निमित्तं यस्य क्रमस्य, स साधु क्रमः । श्रुतिप्रमाणका हि वैदिका अर्थाः नैषामन्यत् प्रमाणमस्ति (१।१।२सू०)–इत्युक्तम् । किम् इह उदाहरणम् ? । सत्रे दीक्षाक्रमं विचरन्ति, 'अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति, तत उद्गातारं, ततो होतारं ततस्तं प्रतिप्रस्थाता दीक्षयित्वा अर्द्धिनो दीक्षयति, ब्राह्मणाच्छंसिनं ब्रह्मणः, प्रस्तोतारम् उद्गातुः, मैत्रावरुणं होतुः, ततस्तं नेष्टा दीक्षयित्वा तृतीयिनो दीक्षयति, अग्नीध्रं ब्रह्मणः, प्रतिहर्त्तारम् उद्गातुः, अच्छावाकं होतुः,ततस्तमुन्नेता दीक्षयित्वा पादिनो दीक्षयति, पोतारं ब्रह्मणः, सुब्रह्मण्यमुद्गातुः, ग्रावस्तुतं होतुः, ततस्तमन्यो ब्राह्मणो सुब्रह्मण्योदीक्षयति, ब्रह्मचारी वा आचार्य प्रेषितः–इति । अनियमेन क्रमः कर्त्तव्यो, यथा पूर्वः पक्षः, यथा तर्हि सिद्धान्तः, एष एव क्रमः कर्त्तव्यः–इति ।

तत्र आह, अन्याय्यं श्रुतिवचनम्–इति । उच्यते,-किमयं न साधुः ? न न साधुः–इति ब्रूमः । न्याय्यं तर्हि न ब्रूमः,–न साधुः क्रमः–इति, किं तर्हि ?–उक्तस्य पुनर्वचनमन्याय्यम्–इति । उच्यते,–साधोर्वचनं बहुशोऽप्युच्यमानं न्याय्यमेव, असाधोस्तु सकृदप्यन्याय्यम् । आह सकृद्वचनेन ज्ञातस्य पुनर्वचने न प्रयोजनम् इति, उच्यते भवति अविस्मरणमपि प्रयोजनम् इत्युक्तम् । वृत्तिकारेण तत् कार्यम्,–इति चेत् । सूत्रकारस्याप्यविशेषो वृत्तिकारेण । (१म वर्णकम् )

अथवा अर्थान्तरमेव इदम् तत्र हि अन्य एव संशयो विचारो निर्णयश्च,-श्रुतिप्रमाणकोधर्मः अन्यप्रमाणकोवा? इति संशयः । प्रत्यक्षादीनाम् अधिगम्यनिमित्तत्वात् न तत्प्रमाणकः, अतीन्द्रियत्वाच्चोदनालक्षणः–इति विचारः । चोदनालक्षणः एव-इति निर्णयः । इह तु सिद्धे तत्प्रमाणत्वे व्यवहारक्रमस्य साधुत्वावधारणम्(२य वर्णकम्)

अथ वा श्रुतिविचारोऽयं-किं पदार्थाः कर्त्तव्याः? इति विधानम् ? किं वा क्रमो विधीयते ?-इति । अनेकार्थविधानानुपपत्तेः क्रमे अनुवादः, पदार्थानां विधिः, अवदानवाक्येष्विव पादार्थविधानं श्रुत्या, क्रमविधानं वाक्येन, तस्मात् न क्रमो विधीयते-इति पूर्वः पक्षः । ननु अवदानवाक्येषु क्रमो विधीयते सत्यं विधीयते, पाठेन, न श्रुत्या, ये ऋत्विजस्ते यजमानाः "इति तु दीक्षायाः प्राप्तत्वात् क्रमविधानार्था श्रुतिः-इति सिद्धान्तः । तस्मात् अपुनरुक्तम्-इति" (३म वर्णकम्) । भाष्यम्

"अर्थाच्च" २सू०

"किम् एष एव उत्सर्गः ? उत न, सर्वत्र श्रुतिवशेनैव भवितुमर्हति-इति उक्तं हि,–"चोदनालक्षणोऽर्थोधर्म्मः"

एवं प्राप्ते ब्रूमः-अर्थाच्च (सामर्थ्याच्च) क्रमो विधीयते-इति, गुणभूतोहि पदार्थानां क्रमोभवति, यश्च यस्य निर्वर्त्यमानस्य उपकरोति, स तस्य गुणभूतः, यस्मिन्नासौ यमाणे पदार्थः एव न सम्पद्यते,न स गुणभूतः, विनापि